# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा-अक्टूबर-२०१९

| कक्षा -आचार्यप्रथमवर्षम् (सत्रम्-१) | प्रश्नपत्रम् – ५ | गुणाः - ७० |
|---|---|---|
| विषयः - ज्यौतिषशास्त्रम् | (CE.- ४.१.१. New ) | समयः -८.०० तः ११.०० |
| दिनाङ्कः - १४/१०/२०१९ | सन्दर्भग्रन्थः -भारतीयकुण्डलीविज्ञानम्। | |

**प्रथमान्वितिः**

**प्रश्नः १ अधोलिखितयोः कस्यचित् एकस्य उपरि सान्वयं व्याख्यां करोतु। ०५**

(अ) गतैस्यदिवसाद्येन गतिर्निघ्नी खषड्हृता।
लब्धमंशादिना शोध्यं योज्यं स्पष्टो भवेद्ग्रहः॥

(ब) लंकोदया विघटिका गजभानि गोङ्क-
दस्राग्निपक्षदहना क्रमगोत्क्रमस्थाः।
हीनान्विताश्चरदलैः क्रमगोत्क्रमस्थै-
र्मेषादितो घटत उत्क्रमतस्त्विमे स्युः॥

**प्रश्नः २ अधोलिखितयोः कस्यचित् एकस्योपरि निबन्धं लिखत। १०**

(अ) लग्नानयम्।

(ब) लग्नसाधने वैशिष्ट्यम्।

**द्वितीयान्वितिः**

**प्रश्नः ३ अधोलिखितयोः कस्यचित् एकस्योपरि सान्वयं व्याख्यां करोतु। ०५**

(अ) एवं लंकोदयैर्भुक्तं भोग्यं शोध्यं पलीकृतात्।
पूर्वपश्चान्नतादन्यत् प्रागवत्तद्दशमं भवेत्॥

(ब) अजवृषमृगाङ्गनार्ककिमीनवणिजांशकेष्विनाद्युच्चाः।
दशशिख्यष्टाविंशतितिथीन्द्रियत्रिनवविंशेषु॥

**प्रश्नः ४ अधोलिखितयोः कस्यचित् एकस्योपरि निबन्धं लिखतु। १०**

(अ) ग्रहाणामुच्चरश्मिसाधनम्।

(ब) रेखाष्टकविचारः, अवश्थात्रयविचारश्च।

**तृतीयान्वितिः**

**प्रश्नः ५ अधोलिखितयोः कस्यचित् एकस्य सान्वयं व्याख्यां करोतु। ०५**

(अ) सूर्यराश्यंशकोष्ठाङ्कं स्वेष्टकालेन संयुतम्।
यत्र तत्तिर्यगूर्ध्वाङ्कलग्नं राश्यादिकं मतम्॥

(ब) द्विघ्नेष्टनाड्यः पंचाप्ता भं शेषञ्च पलीकृतम्।
दशाप्तमंशास्ते युक्ता रवौ होरादयो भवेत्॥

**प्रश्नः ६ अधोलिखितयोः कस्यचित् एकस्योपरि निबन्धं लिखतु। १०**

(अ) दीप्ताद्यवश्था, पारिजातादिवर्गः।

(ब) सारिणीद्वारा स्पष्टलग्नसाधनविधिः लिखतु।

## चतुर्थान्विति:

**प्रश्न: ७ अधोलिखितयो: कस्यचित् एकस्य सान्वयं व्याख्यां करोतु ।** **०५**

(अ) शिवघ्नोऽब्ध: खखाद्रीन्दुलवाढय: खाग्नि शेषित: ।
जन्मतिथ्यन्वितस्तत्र तिथावब्दप्रवेशनम् ॥

(ब) जन्मलग्नपतिरब्दलग्नपो मुंथहाधिप इतस्त्रिराशिप: ।
सूर्यराशिपतिरह्विचन्द्रमाधीश्वरो निशिविमृश्य पञ्चकम् ॥

**प्रश्न: ८ अधोलिखितयो: कस्यचित् एकस्योपरि निबन्धं लिखतु ।** **१०**

(अ) वर्षेषनिर्णय: ।

(ब) मासप्रवेशविचार: ।

## संयुक्तान्विति:

**प्रश्न: ९ अधोलिखितेषु केषाञ्चित् दशप्रश्नानामतिलघूत्तराणि लिखन्तु ।** **१०**

(१) किन्नाम इष्टकाल: ?

(२) लग्नस्पष्टीकरणे अयनांशस्वोदयमानस्यावश्यकता भवति न वा ?

(३) पंक्ति: स्वेष्टाद्भवेदग्रे पङ्क्त्यामिष्टं विशोधयेत् तच्चालनं धनं ऋणं वा ?

(४) वृषराशे: लंकोदयमानं किम् ?

(५) कन्याराशे: लंकोदयमानं किम् ?

(६) पूर्वनतं कथं उत्पद्यते ?

(७) योगिनी दशा कति विधा भवति ?

(८) मंगलादशा प्रथमं वा अन्तिमदशारूपेण वर्तते ?

(९) इष्टघटे: अपरनाम किम् ?

(१०) सायनमेषसंक्रान्ति: यस्मिन् चान्द्रमासे भवति तस्य मासस्य नाम किम् ?

(११) दशमलग्नसाधने इष्टकालं वा पूर्वपश्चिमनतं गृह्यते ?

(१२) एकस्मिन् राशौ कति अंशा: भवन्ति ?

(१३) पञ्चाधिकारिग्रहा: के ?

(१४) देशान्तरं कतिविधम् भवति ?

(१५) रेखांशान्तरं चतुर्भि:गुण्यते चेत् मिनटादिकं भवति न वा ?

----oooo----